National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(60): 96-97
© 2025 NJHSR
www.sanskritarticle.com

**ड. श्रद्धाञ्जलि महपात्र**
सहायकाचार्या,
अद्वैत वेदान्त विभाग,
श्री जगन्नाथसंस्कृतविश्वविद्यालयः,
पुरी, ओड़ीशा

**Correspondence:**
**ड. श्रद्धाञ्जलि महपात्र**
सहायकाचार्या,
अद्वैत वेदान्त विभाग,
श्री जगन्नाथसंस्कृतविश्वविद्यालयः,
पुरी, ओड़ीशा

# एकं सद् विप्राः बहुधा वदन्ति

**ड. श्रद्धाञ्जलि महपात्र**

परमात्मनः सृष्टिः इदं जगत्। जीव-परमयोः तत्वं सर्वेषु दर्शनेषु निगुढ्तत्वत्वेन पर्यलोच्यते। द्वैत – द्वैताद्वैत – विशिष्टाद्वैत – अचिन्त्यभेदाभेद-अद्वैतादयः दर्शनेषु एकं ब्रह्मणः बहुरुपत्वं प्रतिपादितम् । तत्र शंकरः-रामानुजः-निम्बार्कः-मध्वः – वल्लभाचार्यादयः आचार्याः भाष्यपञ्चकेषु स्व-स्व मतानि उपस्थापितवन्तः। आचार्यशंकरस्य शारीरकभाष्यं, रामानुजाचार्यस्य श्रीभाष्यं, आचार्यनिम्बार्कस्य वेदान्तपारिजातसौरभं , मध्वाचार्यस्य मध्वभाष्यं तथा आचार्यवल्लभस्य अणुभाष्यं च प्रमुख-स्थानानि भजन्ते।

तत्र अद्वैतमतदृष्ट्या आचार्यशंकरस्य सिद्धान्तः वर्तते" जीवब्रह्मैव ना परः"। मुक्तिप्राप्तिरेव तत्वसाधनस्य परमं लक्ष्यम्। "यदा सर्वे प्रमुच्यन्ते कामा ह्यस्य हृदिस्थिताः"[i] इतिश्रुतेः। तेषां सिद्धान्तानुसारं परमात्मप्राप्तिरेव मोक्षः। परमात्मा तु आत्मा ब्रह्म वेति शब्देन उच्यते। "बृहत्वात् बृहणत्वाच्च आत्मैव ब्रह्म इति गीयते" इति श्रुतेः। ब्रह्मैव नित्य-शुद्ध-वुद्ध-मुक्तस्वरुपम्, आनन्दैकरसस्वरुपम्, ज्ञानस्वरुपम्, "प्रज्ञानघन" इति श्रुतेः। तद्ब्रह्म स्वगत-सजातीय-विजातीयादि भेदरहितत्वम्। सर्वं जगत् ब्रह्मणा एव प्रतिभासते। "सर्वं खल्विदं ब्रह्म" इति श्रुतेः। आत्मतत्वम् तु नित्यं, निर्विकारं, निश्चलम्, असङ्गम्, अखण्डं, कुटस्थम्, एकं, शुद्धचैतन्यस्वरुपं, निर्विशेषं च वर्तते। "साक्षी चेता केवलो निर्गुणश्च।" इति श्रुतिप्रमाणात् । एकं सच्चिदानन्दघनानुभव एव ज्ञानम्। तच्चज्ञानं ब्रह्मज्ञानम् । ब्रह्मज्ञानेन मुक्तिरिति वेदान्तडिण्डिमः।

तत्र रामानुजस्य विशिष्टाद्वैत-सिद्धान्तानुसारं द्विविधं ब्रह्म। स्थुलचेतनाचेतनविशिष्टं सूक्ष्मचेतना-चेतनविशिष्टञ्च । इथं च उभयविधं ब्रह्मैकत्वं प्रतिपादक-सिद्धान्तो विशिष्टाद्वैतवादः ।

यथा श्रीभाष्ये "ब्रह्मणोऽनन्तेन कल्याणगुणगणेन विशिष्टत्वं सिद्धम्"[ii] । सगुननिर्गुणभेदेन ब्रह्मणः भेदः। एतेषां मतानुसारं जीवः ब्रह्म चोभयं चेतनम् । ब्रह्म विभुः जीवश्च अणुः। जीव अल्पज्ञः, ब्रह्मश्च सर्वज्ञः। "भेदव्यपदेशाश्चान्य", "अंशोनानाव्यपदेशात्"। इत्यादि सुत्रेषु जीवब्रह्मणोर्मध्ये भेदः प्रतिपादितः। एतेषां मते भक्तिरेव मुक्तेः प्रधानोपायः। भक्तिद्वारा भगवत्प्रसादेनैव जीव ब्रह्मसायुज्यतां प्राप्नोति। जीवन्मुक्तिः अत्र न मन्यते, अपितु शरीरपातानन्तरं मुक्तरिति तेषामभिप्रायः। शरिरपातानन्तरमपि जीव जीवरूपेणैवावतिष्ठते। न स कदापि ब्रह्मभवितुं शक्नोति । तस्मिन् समये निरवच्छिन्नब्रह्मानन्दानुभवेन कृतार्थः सन् जीवः सर्वभयविनिर्मुक्तो भवति। "आनन्दं ब्रह्मणो विद्वान् न विभेति कुतश्चन" इति श्रुतिरपि अत्र प्रमाणम्। आचार्य शंकर विवर्तवादस्य समर्थकः किन्तु आचार्य रामानुजः परिणामवादस्य सत्कार्यवादस्य च समर्थकः।

एतेषां मतानुसारं भगवतो दासत्वप्राप्तिरेव मोक्षः। मोक्षदशायां केवलानन्दानुभव एव तस्य कृते विशेषो लाभः। आचार्यशंकरानुसारं बुद्धिरुप उपाधिनाशे जीव ब्रह्मणा सहैकीभुतस्तदाकारतां भजते। मुक्तदशायां ब्रह्मणि लीयते । रामानुजमते जीवस्तु पृथक् अवतिष्ठते। आचार्यशंकरमते तत्वमस्यादि महावाक्यानां बोधानन्तरम् अहंब्रह्मास्मि ज्ञानेन मुक्तिः किन्तु रामानुजानुसारं ज्ञानं तु मुक्तेः सहायकमेव।

निम्बार्कस्य द्वैताद्वैतसिद्धान्तानुसारं जीव जगच्चोभयौ ब्रह्मणः परिणामौ । जीव ब्रह्मणोः भिन्नाभिन्नत्वं च वर्तते। परमतत्वं ब्रह्म कृष्णनामधेयम्। अयं च कृष्ण ईश्वरः। स च "प्रकृत्या अज्ञानाहंकृतिलोभमोहादि सकलप्राकृतदोषरहितो गुणगणालयः।" ईश्वरः सर्वजनपुज्यः वासुदेव-संकर्षण-प्रद्युम्नानुरुद्धनामकचतुर्व्युह-सम्पन्नो मत्स्यकुर्मादि विभिन्नरुपेणावतरति। इदमेव ब्रह्म जगतो निमित्तोपादानकारणम्। ईश्वरश्च सर्वद्रष्टा अक्षरः, विश्वकर्ता, जीवानां नियन्ता, स्वयम्भुः, सनातनःअक्षरश्च सत्ब्रह्म सर्वातिशायि सर्वज्ञानमय परब्रह्म वोच्यते। पुरे शेते इति पुरुषः। स च विश्वरुपः शरीरे वर्तमानत्वात् चित्पुरुषः हिरण्यगर्भः वा कथ्यते। स च ईश्वरस्य व्यक्तरूपः। विराडरुपस्य हिरण्यगर्भस्य पृथक् पृथक् भागेषु अनन्तजीवा निवसन्ति। यच्चोक्तम्-

**" अप्रेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्।**

**जीवभुतां महाबाहो ययेदं धार्यते जगत्॥"**[iii]

जीब्रह्मणो अंशांशिभावो वर्तते एतेषां सिद्धान्ते। अतस्तयोः भिन्नत्वमभिन्नत्वं च वर्तते । तत्वमसि-महावाक्ये तच्छब्दः सर्वज्ञः सर्वशक्तिमान् सर्वात्मस्वतन्त्रसत्तारूपो ब्रह्मणो वाचकः । त्वं शब्दश्च ब्रह्माश्रितस्य जीवस्य बोधकः।

तन्नये भक्तिरेव मुक्तेः साधनम् । उपासनया एव ब्रह्मप्राप्तिः। तच्च ब्रह्म सगुण निर्गुणोभयरुपेण उपासितुं शक्यते। उपासना-फलेन चार्चिरादिमार्गेण ब्रह्मलोकावाप्तिः।

मध्वमते ब्रह्म सगुण सविशेषं च वर्तते। तच्च स्वतन्त्रतत्वम्। अनन्त गुणस्वरुपम् । हरिर्विष्णुच श्रेष्ठः। सर्वे देवाः तद् वशवर्तिनः। स एव सृजति, पालयति, संहरति मुक्तिं च ददाति। कालतः देशतः गुणतश्च स निस्सीमशक्तिः स्वतन्त्रः। स हि ज्ञानानन्दस्वरुपः सर्वतन्त्रस्वतन्त्रः। विभिन्नेषु अपि वस्तुषु एकस्तद्भिन्नम्। जीव अणुः प्रतिशरीरं भिन्नः अस्वतन्त्रो भगवतो भिन्नम् ।

हरेः साक्षात् ज्ञानेन साक्षात्कारेण वा मोक्षप्राप्तिः। वैकुण्ठप्राप्तिरेव तन्मते मुक्तिः। सा च स्थुलसूक्ष्मसर्वपदार्थियथार्थज्ञानेन संजायते। भक्तिरेव मुक्तेः साधनम्। त्यागः, मुक्तिः,ईश्वरप्रत्यक्षानुभुतिस्चैतत्सर्वं मुक्तेरेकमात्र साधनम्। मध्वाचार्यस्य अयं सिद्धान्तः वैष्णवभक्ति-सिद्धान्तस्य फलम्।

जीवश्च भगवतोः दासः। अशेषस-द्गुणयुक्तः भगवान् विष्णुः स्वतन्त्रतत्वम्।

जीव जडं जगच्च अवतन्त्रतत्वम्। स्वतन्त्रस्य भगवतः प्रसन्नतावाप्तिः एकमात्रं पुरुषार्थः। सारुप्यसालोक्यादि मुक्तिरेव परमार्थः।

मायारहितं ब्रह्म जगत्कारणम् इत्युक्ते शुद्धाद्वैतदर्शने वल्लभ-सिद्धान्ते शुद्धब्रह्मणः अवतारणं जातम्। मायारहितो ब्रह्मजीवयोरैक्यं इति तेषां सिद्धान्तः। जीवश्चाणु ब्रह्मणोऽअभिन्नस्तदंशश्च। शुद्धाद्वैत-मार्तण्डे चोक्तं -

**" माया सम्वन्धरहितं शुद्धमित्युच्यते बुधैः**

**कार्यकारणरूपं हि शुद्धं ब्रह्म न मायिकम्।"**[iv]

सच्चिदानन्दस्वरुपं हि परब्रह्म । भगवान श्रीकृष्ण एव स परब्रह्म। जगत च एतत् भगबतो लीलाविलासः। वल्लभ एव ब्रह्म साकारम्, सर्वश्क्तिमत्, सर्वज्ञम्, सर्वकर्तु सच्चिदानन्दस्वरुपं च स्वीक्रियते। एतदेव ब्रह्म जगतो निमित्तोपादानं च कारण्म्।

ब्रह्म हि स्वेच्छ्या एव जीव जडादिरुपेण केवलं लीलया एव आविर्भवति।" लोकवत्तु लीलाकैवल्यं " इति सुत्रानुसारम् । जीव अणुः ब्रह्मांशः। स च ब्रह्मवत् चेतनः शुद्धश्च । ब्रह्मरुप कारण्स्य एतत्जगत कार्यम् । जगत एव सत् । लीलायैव केवलं ब्रह्म स्वेच्छया जगद्रुपेण परिणमतीति जगतो ब्रह्मात्मकत्वम ।क्रीडार्थमेव च तेन जगत् सृष्ट्म्। न तत्र एकाकिनः क्रीडा संभवः इति भगवत्ता जीवा निमित्ता भक्तैव केवलं प्राप्या। तत्र कर्मणामवलम्बनेन भक्तानां चितशुद्धिः जायते । ज्ञानेन चात्मबोधः।

विदेहमुक्तौ सत्यामेव तु जीव भगवत् सान्निध्ये स्थितः तत्सेवां कुर्वान्नानन्दमयजीवनं यापयति।

भाष्यकाराणां तदीयदार्शनिकविचारेषु यद्यपि मतभेदः तथापि एतेन आत्मज्ञानस्य चरमलक्ष्ये अग्रेसराः भवन्ति। आचार्यशंकरस्य निरुपिताद्वैतासिद्धान्ते च तदेव ब्रह्म मायातीतम्। रामानुजाचार्यस्य निरुपितविशिष्टाद्वैतसिद्धान्ते च तत विश्वव्यापी स्वरुपम्। निम्वार्काचार्यस्य मतानुसारम ब्रह्म द्वैताद्वैतमुभयरुपम्। मध्वाचार्येण द्वैतमाश्रित्य ब्रह्म सृष्टिकर्तुः स्वीकृत्य एतत दृश्यमानं जगत तस्य कार्यमुक्तम्। वल्लभाचार्यस्य मते च तत शुद्धमायारहितम् ।

तथापि सर्वेषु पार्थक्य स्थिते सति एकं ब्रह्मणः वर्णनं जातम् । सर्वेषु दर्शनेषु अद्वैतदर्शनं महत्वपूर्णं स्थानं भजते इत्यत्र नास्ति संशयः।

**संदर्भ ग्रंथः**

i. क-उ-२-३-१४

ii. श्रीभाष्य-३-२-२५

iii. गीता-७-५

iv. शुद्धाद्वैत मार्तण्ड -२८